संस्कृतवार्ताः

26.10.2025

प्रात: - 06:55

## प्रधानमन्त्री - आसियान

प्रधानमन्त्री - आसियान :: प्रधानमन्त्री नरेन्द्र मोदी द्वाविंशतितमे आसियान शिखरसम्मेलने आभासीय रूपेण भागं गृहीष्यति। अद्य भारत शिखरसम्मेलनम्। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत्, "प्रधानमन्त्री मोदी आसियान-नेतारः च संयुक्तरूपेण आसियान-भारतसम्बन्धेषु प्रगतेः समीक्षां करिष्यन्ति, व्यापकरणरणनीतिम् सुदृढां कर्तुं उपक्रमेषु चर्चां च करिष्यन्ति । विदेशमन्त्री डॉ. एस.जयशंकरः सप्तविंशति अक्टूबर दिनाङ्के कुआलालम्पुरनगरे विंशतितमे पूर्व एशिया शिखरसम्मेलने प्रधानमन्त्रिण: मोदिन: प्रतिनिधित्वं करिष्यति ।

## प्रधानमन्त्री 'मन की बात' कार्यक्रमः

प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति । मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् सप्तविंशत्यधिक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रमः आकाशवाणी-वार्ता विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति ।हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या क्षेत्रीयासु भाषासु अपि भविष्यति।

## शपथग्रहण-समारोहे

उपराष्ट्रपति: सी.पी. राधाकृष्णन् अद्य सेशेल्स्-देशस्य नवनिर्वाचितस्य राष्ट्रपतेः डॉ. पैट्रिक-हर्मिनी-महोदयस्य शपथग्रहण-समारोहे भागं ग्रहीतुं सेशेल्स्-देशं प्रति गच्छति।

प्रधानमन्त्रिधनधान्यकृषियोजनायां

शिवराज किसान :: केंद्रीय कृषि - कृषक -कल्याण मंत्रिणा शिवराज सिंहचौहानेन उक्तं यत् प्रधानमन्त्रि-धन-धान्यकृषियोजनायां रामनाथपुरम्, शिवगङ्गा, थुथुकुडी, विरुधुनगर जनपदाश्च समाविष्टा: सन्ति। वेल्लोरनगरे कृषकैः सह भाषमाणः सः अवदत् यत् कृषकाणां कृते व्यापकलाभान् प्रदातुं अस्याः परियोजनायाः अन्तर्गतं षड्त्रिंशत् योजनानां एकीकरणं अस्ती।

सूचना-प्रौद्योगिकीमन्त्री अश्विनीवैष्णवः

वैद्युतक -सूचना-प्रौद्योगिकीमन्त्री अश्विनीवैष्णवः उक्तवान् यत् भारतं चलदूरवाणी-निर्माण-उद्योगे आत्मनिर्भरतां प्रति गच्छति। सः अवदत् यत् वर्षद्वये देशे चलदूरवाणी-अवयवानाम् पूर्णं उत्पादनं देशे भविष्यति। ह्यः नवदिल्ल्यां वैष्णवमहोदयेन उक्तं आलोक - लेख - दूरदर्शनयन्त्रेण सीसीटीवी इति अनेन सह देशे विविधानुप्रयोगाणां निर्माणं भवति।

रेलविभागमपि धारयन् केन्द्रीयमन्त्री अश्विनीवैष्णवः पत्रकारैः सह उक्तवान् यत् अस्मिन् उत्सवस्य ऋतौ अद्यावधि प्रायः सार्धैककोटि यात्रिणः रेलयानेन गतवन्तः। सः अवदत् यत् उत्सवानां अन्तं यावत् प्रायः सार्धद्विकोटि यात्रिणः यात्रां करिष्यति इति सम्भावना अस्ति। वैष्णवमहोदयः अवदत् यत् जनसम्मर्दन प्रबन्धनस्य सुविधायै त्रिंशत् रेलस्थात्रेषु बृहन्ति प्रतीक्षा क्षेत्राणि निर्मितानि सन्ति।

बिहार-छठ

बिहार राज्ये छठपर्व सश्रद्धं-सोल्लासं पारम्परिक रीत्या च परिपाल्यते। श्रद्धालवः पूजा-संबद्ध-परम्परायां 'खरना' इति विधिः सोल्लासम् आमानयन्ति। श्रद्धालवः षडत्रिंशत्-होरात्मकम् उपवासव्रतमपि आचरिष्यन्ति। अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्रमोदिना जनाः अभिनन्दिताः।

डिजिटल-कल्याणकारिणः

रक्षामन्त्रिणा राजनाथसिंहेन राजस्थानस्य जैसलमेरनगरे थलसेना कमाण्डर - सम्मेलने अनेके प्रमुखाः डिजिटल-कल्याणकारिणः उपक्रमाः लोकार्पिताः।

विज्ञान-प्रौद्योगिकीराज्यमन्त्री

विज्ञान-प्रौद्योगिकीराज्यमन्त्री जितेन्द्रसिंहः स्वास्थ्यसेवासंशोधनक्षेत्रे वैश्विकमानकानि प्राप्तुं स्वास्थ्यसेवायां निजीक्षेत्रस्य सहभागितायाः प्रोत्साहनार्थं प्रयत्नानाम् उपरि बलं दत्तवान्। दिल्लीविश्वविद्यालयस्य एकस्मिन् कार्यक्रमे सः अवदत् यत् शिक्षणस्य, अनुसन्धान- उद्योगयोश्च च एकीकरणं अग्रे गमनस्य मार्गः अस्ति। डॉ. सिंहः अवदत् यत् प्रधानमन्त:रिणः नरेन्द्रमोदिनः नेतृत्वे अन्तरिक्ष- परमाणु- जैव- प्रौद्योगिकी- क्षेत्राणि निजीक्षेत्राय उद्घाटनेन निजीक्षेत्रस्य जनतायाश्च मध्ये अन्तरालं पूरयितुं साहाय्यम् भविष्यति।

क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायाम्, सिड्नी-नगरे अन्तिमायां एकदिवसीय क्रीडायां नव-स्तोभैः सहज-विजयेन आतिथेय-आस्ट्रेलिया-दलस्य विरुद्धं तिसृणां क्रिकेट क्रीडा-श्रृङ्खला भारतेन विजिता।

संस्कृत-साप्ताहिकी

संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्. गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैकवादनतः भविष्यति। कृपया शृण्वन्तु

।।इति वार्ता:।।